( अस्या जन्मादिविवरणन्तु महाभारते वन-
पर्व्वणि ६६ अध्यायमारभ्य द्रष्टव्यम् । )

लोपामुद्रापतिः, पुं, ( लोपामुद्रायाः पतिः । ) अगस्त्यमुनिः । इति पुराणम् ॥

लोपाशकः, पुं, (लोपं व्याकुलीभावं चकितमश्नाति । अश् + ण्वुल् । ) शृगालः । इति हारावली ॥

लोपाशिका, स्त्री, ( लोपाशक + स्त्रियां टाप् । अत इत्वम् । ) शृगाली । इति हारावली । १७२ ॥

लोप्त्रं, क्ली, ( लुप् + ष्ट्रन् । ) स्तेयधनम् । लोतम् । इत्यमरः ॥ ( यथा, महाभारते ।१।१०७।५।
"ते तस्यावसथे लोप्त्रं दस्यवः कुरुसत्तम ! ।
निधाय च भयाल्लीनास्तत्रैवानागते बले ॥" )

लोप्त्री, स्त्री, ( लोप्त्र + षित्वात् ङीष् । ) लोप्त्रम् । इति शब्दरत्नावली ॥

लोभः, पुं, ( लुभ् + घञ् । ) आकाङ्क्षा । परद्रव्याभिलाषः । तत्पर्य्यायः । तृष्णा २ लिप्सा ३ वशः ४ स्पृहा ५ काङ्क्षा ६ शंसा ७ गर्द्धः ८ वाञ्छा ९ इच्छा १० ईहा ११ मनोरथः १२ कामः १३ अभिलाषः १४ । इति हेमचन्द्रः ॥ * ॥ तस्य लक्षणं यथा,—
"परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते ।
अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्त्तितः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥ * ॥
स च ब्रह्मणोऽधराज्जातः । यथा,—
"भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः ।"
इति मात्स्ये सृष्ट्युत्पत्तिर्नाम ३ अध्यायः ॥ * ॥
स तु नाशकारणं यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुडे नीतिसारे ११५ अध्यायः ॥
अपि च ।
"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥"
इति श्रीभगवद्गीतायाम् १६ अध्यायः ॥
( लोभनिन्दाविषयकश्लोकानि यथा,—
"लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च ।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति क्रोधाद्द्रोहः प्रवर्त्तते ।
द्रोहेण नरकं याति शास्त्रज्ञोऽपि विचक्षणः ॥
मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम् ।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम् ॥
लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥
लोभाविष्टो नरो वित्तं वीक्षते न स चापदम् ।
दुग्धं पश्यति मार्ज्जारो यथा न लगुडाहतिम् ॥
प्रायेण धनिनामेव धनलोभो निरन्तम् ।
पश्य कोटिद्वयोपेतं लक्षाय प्रवणं धनुः ॥
नात्यर्थमर्थाधितया लुब्धसुद्वेजयेज्जनम् ।
अभिद्रुत्वाचरन् लोभं व्यमानोऽश्नुजद्विषम् ॥
लोभः सदा विचिन्त्यो लुब्धेभ्यः सर्व्वतो भयं दृष्टम् ।
कार्य्याकार्य्यविचारो लोभविमूढस्य नास्त्येव ॥
सत्यप्रशमतपोभिः शास्त्रधनैः शास्त्रवेदिभिर्विजितः ।
लोभो यत्र प्रविष्टः कुटिलं हृदयं किरातीनाम् ॥
स्नेहोपपन्न इति पूर्णदशाविशेष-
शाली स्वमात्मनि वसुप्रकरं निधाय ।
लब्धोदये तमथ गृह्णति पद्मबन्धौ
दीपा भवन्ति कलुषा बलवान् हि लोभः ॥
यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमथनक्लेशं कृषिं कुर्व्वते ।
सेवन्ते कृपणं पतिं गजघटासङ्घट्टदुःसञ्चरं
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्ज्जितम् ॥" * । )

लोभी, [ न् ] त्रि, ( लोभोऽस्यास्तीति । लोभ + इनिः । ) लोभयुक्तः । तत्पर्य्यायः । गृध्नुः २ गर्द्धनः ३ लुब्धः ४ अभिलाषुकः ५ तृष्णकः ६ लोलुपः ७ लोलुभः ८ । इति जटाधरः ॥ लिप्सुः ९ । इति हेमचन्द्रः ॥

लोभ्यः, पुं, ( लुभ्यते इति । लुभ + यत् । ) मुद्गः । इति हेमचन्द्रः ॥ लोभनीये, त्रि ॥

लोम, [ न् ] क्ली, ( लूयते छिद्यते इति । लू + "नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्।" उणा० ४ । १५० । इति मनिन्प्रत्ययेन साधुः ।) शरीरस्थकेशः । तत्पर्य्यायः । तनूरुहम् २ रोम ३ । इत्यमरः ॥ तनुरुहम् ४ तनुरुट् ५ । इति शब्दरत्नावली ॥ ( यथा, मुण्डकोपनिषदि । १ । १ । ७ ।
"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ॥")
तत्तु गर्भस्थस्य षष्ठे मासि भवति । इति सुखबोधः ॥ अपि च ।
"षष्ठे मासि च नारीणां वैद्यके नाधिकारिता ।
उदरस्थस्य बालस्य नखलोमप्रवर्त्तनात् ॥"
इति स्मृतिः ॥
(तथास्य विवृतिः ।
"अस्थीनि मलानि लोमानि अचक्षुषि भवन्ति हि ।
सन्ति यावन्ति लोमानि तावन्तो लोमकूपकाः ॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते ।
सन्निवेशश्च मात्राणां नान्यास्ते कारणान्तरम् ॥"
निर्वृत्तिः सिद्धिः स्वभावात् ईश्वरात् । सन्निवेशो रचनाविशेषः । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । )

लोमं, क्ली, लाङ्गूलम् । इति जटाधरः ॥ ( रोम । यथा, तैत्तिरीयसंहितायाम् । ५ । १ । ६ । २ ।
"अथो शन्त्वायाजलोमैः संसृजत्येवा वा अग्नेः प्रिया तनूर्यद्जेति ॥" )

लोमकरणी, स्त्री, मांसच्छदा । इति राजनिर्घण्टः ॥

लोमकर्णः, पुं, (लोमयुक्तौ कर्णौ यस्य ।) शशकः । इति हेमचन्द्रः ॥ ( अस्य पर्य्यायो यथा,—
"लम्बकर्णः शशः शूली लोमकर्णो विलेशयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ ) लोमयुक्तकर्णविशिष्टे, त्रि ॥

लोमघ्नं, क्ली, ( लोमानि हन्तीति । हन + टक् ।) इन्द्रलुप्तकम् । इति भूरिप्रयोगः ॥ टाक इति भाषा ॥ लोमघातके, त्रि ॥

लोमपादः, पुं, ( लोमानि पादयोर्यस्य । ) अङ्गदेशीयराजविशेषः । स तु ऋष्यशृङ्गमुनिश्वशुरः । इति रामायणम् ॥ ( अयं हि सूर्य्यवंशावतंसस्य दशरथस्य सखा । विप्रावमाननात एवास्य राष्ट्रे बहुकालं अवग्रहः समभूत तत एवासौ काश्यपं ऋष्यशृङ्गं स्वराष्ट्रे आनीय शान्तां नाम दशरथकन्यामस्मै दत्तवान् । एतद्वृत्तान्तस्तु महाभारते वनपर्व्वणि ११० अध्यायतो विशेषतो द्रष्टव्यम् ॥ )

लोमपादपूः, स्त्री, ( लोमपादस्य पूः । ) पुरीविशेषः । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । चम्पा २ मालिनी ३ कर्णपूः ४ । इति हेमचन्द्रः ॥

लोमफलं, क्ली, ( लोमयुक्तं फलम् । ) भव्यम् । इति राजनिर्घण्टः ॥

लोमविषः, पुं, ( लोम्नि विषं यस्य । ) व्याघ्रादिः । इति हेमचन्द्रः ॥

लोमशः, पुं, ( लोमानि सन्त्यस्येति । लोमन् + "लोमादिभ्यः शः ।" इति शः ।) मुनिविशेषः । ( मुनिवरोऽयं तीर्थगमनाभिलाषिणः सानुजस्य युधिष्ठिरस्यानुगामी सर्व्वतीर्थवृत्तान्तमस्मै विज्ञापयामासेति महाभारते वनपर्व्वणि द्रष्टव्यम् ॥ * ॥ ) मेषः । अतिलोमान्विते, त्रि । इति मेदिनी । शे, २७ ॥ यथा,—
"कदाचिद्गुरो मूर्खः कदाचिल्लोमशः सुखी ॥"
इति सामुद्रकम् ॥
( धान्यापहरणरूपकर्म्मविपाकात् लोमशो भवति । यथा, महाभारते । १३ । १११ ।११६।
"धान्यं हृत्वा तु पुरुषो लोमशः संप्रजायते ॥")

लोमशकाण्डा, स्त्री, ( लोमशः काण्डो यस्याः । ) कर्कटी । इति राजनिर्घण्टः ॥ ( कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः ॥ )

लोमशपर्णिनी, स्त्री, (लोमशं पर्णमस्त्यस्या इति । इनि । ङीप् । ) माषपर्णी । इति शब्दचन्द्रिका ॥

लोमशपुष्पकः, पुं, ( लोमशानि पुष्पाणि यस्य । कप् । ) शिरीषवृक्षः । इति राजनिर्घण्टः ॥

लोमशमार्ज्जारः, पुं, ( लोमशो लोमबहुलो मार्ज्जारः । ) मार्जारविशेषः । गन्धनकुला